तैलीनं, क्ली, ( तिलानां भवनं क्षेत्रम् । तिल+ "विभाषा तिलमाषेति ।" ५ । २ । ४ । इति पक्षे खञ् । ) तिलक्षेत्रम् । इत्यमरः ।२।९।७॥ ( यथाच शब्दरत्नावल्याम् ।
"तिलोद्भवोचितं यत्तु तिल्यं तैलीनमित्यपि ॥")

तैषः, पुं, ( तैषी तिष्यनक्षत्रयुक्ता पौर्णमासी अस्मिन्निति । तैषी+"सास्मिन् पौर्णमासीति।" ४ । २ । २१ । इत्यण् । ) पौषमासः । इत्यमरः । १ । ४ । १५ ॥ (तिष्यनक्षत्रसम्बन्धिनि, त्रि । "तैषमहः । तैषी रात्रिः ।" इति सिद्धान्तकौमुदी ॥ )

तैषी, स्त्री, ( तिष्येण नक्षत्रेण युक्ता । "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।" ४ । ३ । १ । इत्यण् । "तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् ।" इति यलोपः । ङीप् । ) पुष्यनक्षत्रयुक्ता पौर्णमासी । इति मुग्धबोधम् ॥

तोकं, क्ली, ( तौति पूरयति गृहमिति । तु पूर्त्तौ +बाहुलकात् कः । ) अपत्यम् । पुत्त्रो दुहिता च । इत्यमरः । २ । ६ । २८ ॥ (यथा, ऋग्वेदे । १ । ६४ । १४ ।
"तोकं पुष्येम तनयं शतं हिमाः ॥"
शिशुः । बालकः । यथा, भागवते । २ । ७ । २७ ।
"तोकेन जीवहरणं यदुलूकिकाया-
स्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ॥")

तोक्मं, क्ली, कर्णमलम् । इति हेमचन्द्रः ॥ मेघः । इत्यजयपालः ॥

तोक्मः, पुं, ( तकन्ति हसन्ति आनन्दिता भवन्ति लोका अनेनेति । तक+बाहुलकात् मः ओलश्च । ) हरिद्यवः । अपक्वयवः । इत्यमरः । २ । ९ । १६ । ( "यवास्तोक्माः श्रृष्टशीहयो लाजाः ।" इति वाजसनेयसंहितायां महीधरः । १९ । १ ॥ क्वचित् क्लीवलिङ्गोऽयम् । यथा, वाजसनेयसंहितायाम् । १९ । १३ ।
"दीक्षायै रूपं शष्पाणि प्रायणीयस्य
तोक्मानि ॥")
पल्लवाद्यङ्कुरः । यथा,—
"पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते ॥"
इति श्रीभागवते । १० । २२ । २५ ॥
"निर्यासो घनरसः तोक्माः पल्लवाद्यङ्कुराः ।"
इति तट्टीकायां श्रीधरस्वामी ॥

तोटकं, क्ली, द्वादशाक्षरपादच्छन्दः । इति छन्दोमञ्जरी ॥ ( अस्य लक्षणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

तोड, ऋ नादरे । इति कविकल्पद्रुमः ॥ ( भ्वा-परं-सकं-सेट् । ) ऋ, अतुतोडत् । नादरोऽनादरः । इति दुर्गादासः ॥

तोत्त्रं, क्ली, (तुद्यते ताड्यतेऽनेनेति । तुद+"दाम्नीशसयुयुजस्तुतुदेति ।" ३ । २ । १८२ । इति ष्ट्रन् । ) गवादिताड़नदण्डः । पाँचनी इति ख्यातः । तत्पर्य्यायः । प्राजनम् २ तोदनम् ३ गजस्य तोदनदण्डः । तत्पर्य्यायः । वेणुकम् २ । इत्यमरः । २ । ८ । ४१ ॥ वेणुकम् ३ । इति भरतः ॥ ( यथा, रामायणे । २ । ४० । ४१ ।
"न हि तत्पुरुषव्याघ्रो दुःखजं दर्शनं पितुः ।
मातुश्च सहितुं शक्तस्तोत्त्रैर्नुन्न इव द्विपः ॥")

तोदः, पुं, ( तुद व्यथे+भावे घञ् । ) व्यथा । इति रत्नमाला ॥ ( यथा, भागवते । ३।१८।६ ।
"तोदं मृषन्निरगादम्बुमध्याद्-
ग्राहाहतः सकरेणुर्यथेभः ॥"
तुदतीति । तुद+अच् । पीड़ादायके, त्रि । यथा, ऋग्वेदे । ४ । १६ । ११ ।
"यासि कुत्सेन सरथमवस्युस्तोदो वातस्य
हर्य्योरीशानः ॥"
"तोदस्तोदकः ।" इति सायनः ॥ )

तोदनं, क्ली, ( तुद्यतेऽनेनेति । तुद+करणे ल्युट् ।) तोत्त्रम् । इत्यमरः । २ । ९ । १२ ॥ ( तुद+ भावे ल्युट् ।) व्यथा । इति मेदिनी ॥ ने, ७३ ॥ ( यथा, सुश्रुते । १ । २२ ।
"तोदनभेदनताड़नच्छेदनायमनमन्थनेत्यादि ॥")
वृक्षविशेषः । यथा, तत्रैव । १ । ४६ ।
"क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाश्मन्तकाम्बकर्णफल्गुपरूषकगाङ्गेरुकीपुष्करवर्त्तिबिल्वबिम्बीप्रभृतीनि ॥")

तोमरः, पुं क्ली, ( तुम्यति हिनस्तीति । तुम्प+ बाहुलकात् अरप्रत्ययेन साधुः । इत्युज्ज्वलदत्तेनोक्तम् । ३ । १३२ । ) अस्त्रविशेषः । शावली इति भाषा । तत्पर्य्यायः । शर्व्वला २ । इत्यमरः । २ । ८ । ९३ ॥ ( यथा, देवीभागवते । ५ । ५ । २९ ।
"गदाभिः पट्टिशैः शूलैश्चक्रैश्च शक्तितोमरैः ॥")
हस्तक्षेप्यसशल्यदण्डः । इति महाभारतटीका ॥ रायबाँश इति भाषा ॥ ( अस्य आकृत्यादिकमुक्तं वैशम्पायनेन तद्यथा,—
"तोमरः काष्ठकायः स्यात् लौहशीर्षः
सुपुच्छवान् ।
हस्तत्रयोन्नताङ्गश्च रक्तवर्णस्त्ववक्रगः ॥"
शार्ङ्गधरेण तु,—
"फणवत् शीर्षदेशः स्यात्तोमरस्त्वायसस्तथा ॥"
वैशम्पायनोक्तान्यस्य कार्य्याणि यथा,—
"उद्धानं विनियुक्तिश्च वेधनञ्चेति तत्त्रिकम् ।
वल्गितं शक्तितत्त्वज्ञाः कथयन्ति नराधिपाः ॥"
अग्निपुराणोक्तधनुर्व्वेदमतेऽस्य कार्य्याणि यथा,
"दृष्टिघातं भुजाघातं पार्श्वघातं द्विजोत्तम ! ।
ऋजुपक्षेषुणा पातं तोमरस्य प्रकीर्त्तितम् ॥"
जनपदविशेषः । यथा, मात्स्ये । १२० । ५७ ।
"तोमरान् शावयन्ती च हंसमार्गान्
समूहकान् ॥"
नवाक्षरच्छन्दोविशेषे, क्ली । शब्दार्थचिन्तामणिधृतं तल्लक्षणादिकं यथा,—
"प्रथमं सकं विनिधाय
जगणद्वयञ्च निधाय ।
कुरु तोमरं सुखकारि
फणिराजयक्तविहारि ॥"
उदाहरणम्,—
"सखि ! मादके मधुमासि
व्रज सत्वरं किमिहासि ।
सहते न किं विहरामि
किमु पावकं प्रविशामि ॥")

तोमरधरः, पुं, ( तोमरं धरतीति । धृ+अच् । यद्वा, तोमरस्य अस्त्रविशेषस्य धरः ।) अग्निः । इति शब्दार्थकल्पतरुः ॥

तोमरिका, स्त्री, ( तोमर+संज्ञायां कन् । स्त्रीलिङ्गत्वात् टाप् अत इत्वञ्च । ) तुवरिका । इति शब्दरत्नावली ॥

तोयं, क्ली, ( "तवतेर्वृद्धिकर्म्मणः+'अघ्न्यादयश्च ।' उणां ४ । १०८ । इति यत्प्रत्ययो निपातितो द्रष्टव्यः । वर्द्धते वर्षासु । 'तुदति तोयम्' इति क्षीरस्वामी । तुदतेः पूर्व्ववत् यत्प्रत्यये निपातनात् दकारलोपे गुणः । यद्वा, तुदिः सौत्र आवरणार्थः ।" इति निघण्टुनिर्व्वचने देवराजयज्वा । १ । १२ । ६२ । ) जलम् । इत्यमरः । १ । १० । ४ ॥ ( यथा, देवीभागवते । १ । ६ । २६ ।
"तया ततमिदं तोयं तदाधारश्च तिष्ठति ॥"
पूर्व्वाषाढ़ानक्षत्रम् । जलदेवतत्वादस्य तथात्वम् ॥)

तोयकामः, पुं, ( तोयं जलं कामयते इति । कम्+अण् । ) परिव्याधः । जलवेतसः । इति जटाधरः ॥ जलाभिलाषिणि, त्रि ॥

तोयकृच्छ्रं, क्ली, ( तोयेन तोयमात्रपानेन यत् कृच्छ्रं व्रतम् । ) जलमात्रपानरूपव्रतविशेषः । इति मिताक्षरा ॥ ( यथा, मार्कण्डेये ।
"फलकृच्छ्रं स्मृतं फलैस्तोयकृच्छ्रं जलेन तु ॥")

तोयडिम्भः, पुं, ( तोयस्य जलस्य डिम्भ इव । ) घनोपलः । इति हारावली । ५८ ॥

तोयदः, पुं, (तोयं ददातीति । दा+कः ।) मेघः । ( यथा, महानिर्व्वाणतन्त्रे । ४ । ५३ ।
"यदा क्षौणी स्वल्पफला तोयदाः स्तोकवर्षिणः
असम्यक्फलिनो वृक्षास्तदैव प्रबलः कलिः ॥")
मुस्तकम् । घृते, क्ली । इति मेदिनी । दे, ३० ॥ जलदातरि त्रि ॥ ( यथा, महाभारते शान्तिपर्व्वणि ।
"तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ॥")

तोयधरः, पुं, ( तोयं जलं धरतीति । धृ+अच् । तोयस्य धरो वा । ) मेघः । मुस्ता । सुनिषण्णकशाकः । इति मेदिनी । रे, २६५ ॥ ( जलधारिणि, त्रि । यथा, रामायणे । २।६३।१० ।
"सुवन्ति कुसुमान्यत्र नगाः पर्व्वतधातुषु ।
नीला इवातपापाये तोयस्तोयधरा घनाः ॥")

तोयधिः, पुं, (तोयानि धीयन्तेऽत्र । धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः । आतो लोपः । ) समुद्रः । इति पुराणम् ॥ ( यथा, सूर्य्यसिद्धान्ते भूगोलाध्याये । ३७ ।
"समन्तात् मेरुमध्यात्तु तुल्यभागेषु तोयधिः ॥")